## अभ्यासः



### उच्चारणं कुरुत-

| | | |
|---|---|---|
| कस्मिंश्चित् | विचिन्त्य | साध्विदम् |
| क्षुधार्तः | एतच्छ्रुत्वा | भयसन्त्रस्तमनसाम् |
| सिंहपदपद्धतिः | समाह्वानम् | प्रतिध्वनिः |

### एकपदेन उत्तरं लिखत-

(क) सिंहस्य नाम किम्?

(ख) गुहायाः स्वामी कः आसीत्?

(ग) सिंहः कस्मिन् समये गुहायाः समीपे आगतः?

(घ) हस्तपादादिकाः क्रियाः केषां न प्रवर्तन्ते?

(ङ) गुहा केन प्रतिध्वनिता?

### पूर्णवाक्येन उत्तरत-

(क) खरनखरः कुत्र प्रतिवसति स्म?

(ख) महतीं गुहां दृष्ट्वा सिंहः किम् अचिन्तयत्?

(ग) शृगालः किम् अचिन्तयत्?

(घ) शृगालः कुत्र पलायितः?

(ङ) गुहासमीपमागत्य शृगालः किं पश्यति?

(च) कः शोभते?

### 4. रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत-

(क) क्षुधार्तः सिंहः कुत्रापि आहारं न प्राप्तवान्।

(ख) दधिपुच्छः नाम शृगालः गुहायाः स्वामी आसीत्।

(ग) एषा गुहा स्वामिनः सदा आह्वानं करोति।

(घ) भयसन्त्रस्तमनसां हस्तपादादिकाः क्रियाः न प्रवर्तन्ते।

(ङ) आह्वानेन शृगालः बिले प्रविश्य सिंहस्य भोज्यं भविष्यति।

### 5. घटनाक्रमानुसारं वाक्यानि लिखत-

(क) गुहायाः स्वामी दधिपुच्छः नाम शृगालः समागच्छत्।

(ख) सिंहः एकां महतीं गुहाम् अपश्यत्।

(ग) परिभ्रमन् सिंहः क्षुधार्तो जातः।

(घ) दूरस्थः शृगालः रवं कर्तुमारब्धः।

(ङ) सिंहः शृगालस्य आह्वानमकरोत्।

(च) दूरं पलायमानः शृगालः श्लोकमपठत्।

(छ) गुहायां कोऽपि अस्ति इति शृगालस्य विचारः।



### 6. यथानिर्देशमुत्तरत-

(क) 'एकां महतीं गुहां दृष्ट्वा सः अचिन्तयत्' अस्मिन् वाक्ये कति विशेषणपदानि, संख्यया सह पदानि अपि लिखत?

(ख) तदहम् अस्य आह्वानं करोमि- अत्र 'अहम्' इति पदं कस्मै प्रयुक्तम्?

(ग) 'यदि त्वं मां न आह्वयसि' अस्मिन् वाक्ये कर्तृपदं किम्?

(घ) 'सिंहपदपद्धतिः गुहायां प्रविष्टा दृश्यते' अस्मिन् वाक्ये क्रियापदं किम्?

(ङ) 'वनेऽत्र संस्थस्य समागता जरा' अस्मिन् वाक्ये अव्ययपदं किम्?

7. मञ्जूषातः अव्ययपदानि चित्वा रिक्तस्थानानि पूरयत-

कश्चन दूरे नीचैः यदा तदा यदि तर्हि परम् च सहसा

एकस्मिन् वने .......... व्याधः जालं विस्तीर्य .......... स्थितः। क्रमशः आकाशात् सपरिवारः कपोतराजः .......... आगच्छत्। .......... कपोताः तण्डुलान् अपश्यन् .......... तेषां लोभो जातः। परं राजा सहमतः नासीत्। तस्य युक्तिः आसीत् .......... वने कोऽपि मनुष्यः नास्ति। कुतः तण्डुलानाम् सम्भवः। .......... राज्ञः उपदेशम् अस्वीकृत्य कपोताः तण्डुलान् खादितुं प्रवृत्ताः जाले .......... निपतिताः। अतः उक्तम् '.......... विदधीत न क्रियाम्'।

## योग्यता-विस्तारः

**ग्रन्थ-परिचय** - विष्णुशर्मा ने राजा अमरशक्ति के मूर्ख पुत्रों को कुशल राजनीतिज्ञ बनाने के उद्देश्य से कथाओं के संकलन के रूप में पञ्चतन्त्र की रचना की थी। इसमें मित्रभेद, मित्रसम्प्राप्ति, काकोलूकीय, लब्धप्रणाश तथा अपरीक्षित-कारक; इन पाँच खण्डों में कुल 70 कथाएँ तथा 900 श्लोक हैं। श्लोकों में प्रायः तर्कपूर्ण नीतिश्लोक प्रयुक्त हैं। पञ्चतन्त्र का अनुवाद चतुर्थ शताब्दी के आस-पास ईरान की पहलवी भाषा में हुआ था। इसी के आधार पर विदेशी भाषाओं में इसके अनेक अनुवाद हुए।

'काकोलूकीयम्' पञ्चतन्त्र का तृतीय तन्त्र है। इसका नाम काक और उलूक की मुख्य कथा के कारण पड़ा है।

## व्याकरणम्

**अव्यय** - संस्कृत में दो प्रकार के शब्द हैं-विकारी तथा अविकारी। विकारी शब्द परिवर्तनशील हैं। संज्ञा, सर्वनाम, विशेषण और क्रिया शब्द विकारी हैं। जैसे-बालकः, सः, शुक्लः, गच्छति। अविकारी शब्द अव्यय कहलाते हैं। इनके रूप कभी नहीं बदलते।

## अभ्यासः



1. पाठे दत्तं गीतं सस्वरं गायत।

2. अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखत-

(क) स्वकीयं साधनं किं भवति?

(ख) पथि के विषमाः प्रखराः?

(ग) सततं किं करणीयम्?

(घ) एतस्य गीतस्य रचयिता कः?

(ङ) सः कीदृशः कविः मन्यते?

3. मञ्जूषातः क्रियापदानि चित्वा रिक्तस्थानानि पूरयत-

| निधेहि | विधेहि | जहीहि | देहि | भज | चल | कुरु |
|---|---|---|---|---|---|---|

यथा-त्वं पुरतः चरणं निधेहि।

(क) त्वं विद्यालयं .......... ।

(ख) राष्ट्रे अनुरक्तिं .......... ।

(ग) मह्यं जलं .......... ।

(घ) मूढ! .......... धनागमतृष्णाम्।

(ङ) .......... गोविन्दम्।

(च) सततं ध्येयस्मरणं .......... ।

(अ) उचितकथनानां समक्षम् 'आम्', अनुचितकथनानां समक्षं 'न' इति लिखत-

यथा-पुरतः चरणं निधेहि। आम्

(क) निजनिकेतनं गिरिशिखरे अस्ति।

(ख) स्वकीयं बलं बाधकं भवति।

(ग) पथि हिंस्राः पशवः न सन्ति।

(घ) गमनं सुकरम् अस्ति।

(ङ) सदैव अग्रे एव चलनीयम्।

(आ) वाक्यरचनया अर्थभेदं स्पष्टीकुरुत-

| | |
|---|---|
| परितः | पुरतः |
| नगः | नागः |
| आरोहणम् | अवरोहणम् |
| विषमाः | समाः |

मञ्जूषातः अव्ययपदानि चित्वा रिक्तस्थानानि पूरयत-

एव खलु तथा परितः पुरतः सदा विना

(क) विद्यालयस्य .................. एकम् उद्यानम् अस्ति।

(ख) सत्यम् .................. जयते।

(ग) किं भवान् स्नानं कृतवान् .................. ?

(घ) सः यथा चिन्तयति .................. आचरति।

(ङ) ग्रामं .................. वृक्षाः सन्ति।

(च) विद्यां .................. जीवनं वृथा।

(छ) .................. भगवन्तं भज।

6. विलोमपदानि योजयत-

| | |
|---|---|
| पुरतः | विरक्तिः |
| स्वकीयम् | आगमनम् |
| भीतिः | पृष्ठतः |
| अनुरक्तिः | परकीयम् |
| गमनम् | साहसः |

7. (अ) लट्लकारपदेभ्यः लोट्-विधिलिङ्लकारपदानां निर्माणं कुरुत-

| लट्लकारे | लोट्लकारे | विधिलिङ्लकारे |
|---|---|---|
| यथा-पठति | पठतु | पठेत् |
| खेलसि | .................. | .................. |
| खादन्ति | .................. | .................. |
| पिबामि | .................. | .................. |
| हसतः | .................. | .................. |
| नयामः | .................. | .................. |

(आ) अधोलिखितानि पदानि निर्देशानुसारं परिवर्तयत-

| | | | |
|---|---|---|---|
| यथा - गिरिशिखर | (सप्तमी-एकवचने) | - | गिरिशिखरे |
| पथिन् | (सप्तमी-एकवचने) | - | पथि |
| राष्ट्र | (चतुर्थी-एकवचने) | - | राष्ट्राय |
| पाषाण | (सप्तमी-एकवचने) | - | पाषाणे |
| यान | (द्वितीया-बहुवचने) | - | यानानि |
| शक्ति | (प्रथमा-एकवचने) | - | शक्तिः |
| पशु | (सप्तमी-बहुवचने) | - | पशुषु |

## योग्यता-विस्तारः

### भावविस्तारः

श्रीधरभास्कर वर्णेकर (1918-2005 ई.) नागपुर विश्वविद्यालय में संस्कृत विभाग के ...्यक्ष थे। उन्होंने संस्कृत भाषा में काव्य, नाटक, गीत इत्यादि विधाओं की अनेक ...नाएँ कीं। तीन खण्डों में *संस्कृत-वाङ्मय-कोश* का भी उन्होंने सम्पादन किया। इनकी ...नाओं में 'शिवराज्योदयम्' महाकाव्य एवं 'विवेकानन्दविजयम्' नाटक सुप्रसिद्ध हैं।

प्रस्तुत गीत में पज्झटिका छन्द का प्रयोग है। इस छन्द के प्रत्येक चरण में 16 ...त्राएँ होती हैं। हिन्दी में इसे चौपाई कहा जाता है।

### भाषाविस्तारः

...गच्छति इति नगः। पतन् गच्छतीति पन्नगः।

...सा गच्छतीति उरगः। वसु धारयतीति वसुधा।

... (आकाशे) गच्छति इति खगः। सरतीति सर्पः।